National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2026;** 1(64): 06-07
© 2026 NJHSR
www.sanskritarticle.com

**कार्त्तिक मण्डलः**
शोधच्छात्रः, अद्वैतवेदान्तविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**कार्त्तिक मण्डलः**
शोधच्छात्रः, अद्वैतवेदान्तविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# शाङ्करभाष्यानुसारेण कर्मानुस्मृतिशब्दविध्यधिकरणतात्पर्यालोचनम्

**कार्त्तिक मण्डलः**

**सारांशः**
कर्मानुस्मृतिशब्दविधिभ्यः यः सुप्तो जीवः स एव प्रतिबुध्यते न अन्य इति। अन्यस्य उत्थानं स्वीक्रियते चेत् अन्ये दोषाः सम्भवन्ति। तस्मात् यः सुप्तः स एव प्रतिबुध्यते इति।

**उपोद्घातः**

अस्मिन् जगति सर्वे जीवाः सततं त्रिविधतापैः सन्त्रस्ताः दरीदृश्यन्ते। उक्ततापानां शमनं कथं भवेत्, कथं जनाः जीवनस्य चरमं लक्ष्यं जन्मचक्रात् मुक्तिं प्राप्नुवन्ति इत्यस्मिन् सन्दर्भे मनीषिणः स्वस्व-मतानुसारेण मार्गान् दर्शितवन्तः। तेषु मार्गेषु अद्वैतमार्गः अन्यतमः। आत्यन्तिकदुः खनिवृत्तिपूर्वक-परमसुखावाप्तेः समुपलब्धिः एव परमपुरुषार्थः मोक्ष इति। स च ज्ञानैकगम्य, नान्यः पन्था विद्यते अयनाय इति श्रुतेः। एवं "अयमात्मा ब्रह्म", "तरति शोकमात्मवित्" इत्यादिश्रुत्या अद्वितीयब्रह्मज्ञानस्यैव मोक्षसाधनत्वात् तद्ब्रह्मज्ञानं प्राप्तुम् असमर्थाः मन्दमतयो मुमुक्षवः भृशं विषदन्ति। अतः मुमुक्षुलोकमनुजिघृक्षया परमकारणिको भगवान् बादरायणः ब्रह्मसूत्रं रचितवान्।

अस्मिन् ब्रह्मसूत्रनामकग्रन्थे ४अध्यायाः १६पादाः १९१अधिकरणानि ५५५सूत्राणि सन्ति। तत्र कर्मानुस्मृतिशब्दविध्यधिकरणम् ब्रह्मसूत्रस्य तृतीयाध्यायस्य द्वितीयपादस्य तृतीयाधिकरणं वर्तते।

**विमर्शः**

ब्रह्मणः सकाशात् जीवस्य उत्थानश्रुतेः ब्रह्मैव सुषुप्तिस्थानमिति पूर्वाधिकरणे तदभावाधिकरणे उक्तमस्ति। अर्थात् ब्रह्म सुषुप्तिस्थानं न वक्तव्यम्। नाड्यादीकमेव सुषुप्तिस्थानमिति वक्तव्यम्। एवं पूर्वाधिकरणेन सह अस्य अधिकरणस्य आक्षेपसङ्गतिः सिध्यति।
यः सुप्तो जीवः स एव प्रतिबुध्यते इति निर्धारयितुम् अधिकरणमिदमारभ्यते।

**"स एव तु कर्मानुस्मृतिशब्दविधिभ्यः"[1] इति सूत्रार्थविचारः।**

"सता सोम्य तदा सम्पन्नो भवति"[2] इति विषयवाक्यमत्र वर्तते। इदानीं यः जीवः सुप्तः भवति स एव प्रतिबुध्यते इति नियम उत सः वा, अन्यः वा इति अनियमः स्यात् इति संशयः अत्र उत्पद्यते।

**पूर्वपक्षः**

अत्र पूर्वपक्षिणां मते अनियमः इति। कथमिति चेत् यथा समुद्रे जलविन्दुः प्रक्षिप्यते सः जलराशिः एव भवति। पुनः उद्धरणे च स एव जलविन्दुः उद्धृतः इति तु वक्तुं न शक्यते। तथा सुषुप्तौ जीवः परमात्मना सह एकीभवति। पुनः उत्थानसमये स एव जीव उत्तिष्ठति इति वक्तुं न शक्यते। तस्मात् स वा अन्यः वा जीवः प्रतिबुध्यते, एवम् अनियम इति पूर्वपक्षः।

**सिद्धान्तः**

सूत्रे तुशब्दः पूर्वपक्षनिरासार्थः। अर्थात् यः जीवः सुप्तः स एव प्रतिबुध्यते इत्यत्र कोऽपि नियमः नास्ति। सः भवितुमर्हति अन्यः वा भवितुमर्हति इति यत् पूर्वपक्षैः उक्तं तत् अयुक्तमेव। अत्र सिद्धान्तिनां मते यः सुप्तः स एव प्रतिबुध्यते इति। कथमिति चेत्- कर्मानुस्मृतिशब्दविधिभ्यः।

कर्मशेषानुष्ठानदर्शनात् यः सुप्तः स एव उत्तिष्ठति इति अवगम्यते। यथा दिनद्वयसाध्यं यत् कर्म तस्य अर्धं कृत्वा सुप्तः पुनः परस्मिन् दिने उत्थाय अवशिष्टमर्धं कर्म समापयति।

न तु अन्यः अवशिष्टांशं कर्म समापयितुं शक्नोति। तस्मात् पूर्वदिने अर्धकर्मणः यः कर्ता परस्मिन् दिने अवशिष्टांशकर्मणः कर्ता स एव। अतः यः सुप्तः स एव प्रतिबुध्यते इति गम्यते।

अनुस्मृतेः अपि यः सुप्तः स एव प्रतिबुध्यते इति गम्यते। पूर्वदिने यः अहं यम् अद्राक्षं द्वितीयदिने स अहं तं स्मरामि इति पूर्वानुभूतस्य पश्चात् स्मरणम् अन्यस्य उत्थाने न उपपद्यते। यतोहि एकेन दृष्टम् अन्येन स्मर्तुं न शक्यते। किञ्च ह्यः यः अहं रात्रौ सुप्तः स एव अहम् इदानीम् प्रातः उत्थितः इति च आत्मानुस्मरणम् आत्मान्तरोत्थाने न अवकल्पते। तस्मात् यः सुप्तः स एव प्रतिबुध्यते इति।

श्रुतिशब्देभ्यः अपि सुप्तः एव उत्तिष्ठति इति अवगम्यते। "पुनः प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्तायैव"[3], "सर्वाः प्रजाः अहरहर्गच्छत्याः एतं ब्रह्मलोकं न विन्दति"[4], "त इह व्याघ्र वा सिंहो वा वृको वा वराहो वा पतङ्गो वा दंशे वा मशको वा यद्यद् भवन्ति तत्तदाभवन्ति"[5] इति एते श्रुतिशब्दाः स्वापबोधाधिकारे पठिताः। अर्थात् व्याघ्रादयः जीवाः सुप्तेः प्राग यस्मिन् शरीरे आसन् सुप्तेः अनन्तरं तस्मिन् शरीरे एव भवन्ति। अतः यः सुप्तः स एव प्रतिबुध्यते इति। अत्र यदि आत्मान्तरोत्थानम् इति अङ्गीक्रियते तदा श्रुतिशब्दानां सामञ्जस्यं न स्यात्।

विधिभ्यः अपि यः सुप्तः स एव प्रतिबुध्यते। विधिः नाम कर्म अविद्या च। एवं कर्मविद्याविधिभ्यां सुप्तस्यैव पुनरुत्थानमिति अवगम्यते। न चेत् कर्मविद्याविधयः अनर्थकाः भवेयुः। अत्र अन्यस्य उत्थानमिति स्वीक्रियते चेत् इतोऽपि अन्ये दोषाः भविष्यन्ति। तद्यथा—

१. शरीरान्तरे व्यवहारमाणो जीवो यदि उत्तिष्ठेत्, तर्हि तत्रत्यव्यवहारलोपः स्यात्।

अर्थात् व्यवहारमाणो जीवः यदि अन्यस्मिन् शरीरे उत्तिष्ठेत् तर्हि तस्य पूर्वशरीरे यः व्यवहारः आसीत्, तस्य लोपः स्यात्।

२. यदि एकस्मिन् शरीरे सुप्तः अन्यस्मिन् शरीरे उत्तिष्ठेत् तदा अनया कल्पनया कः लाभः।

३. यदि मुक्तः उत्तिष्ठेत् तदा मोक्षः अनित्यः स्यात्। अर्थात् मुक्तये यत् ज्ञानमपेक्ष्येते तदा तत् ज्ञानं विनैव पुरुषस्य मुक्तिः स्यात्। एवम् मोक्षः अनित्यः भविष्यति।

४. निवृत्ताविद्यस्य च पुनरुत्थानं नोपपद्यते। अतः ईश्वरस्य उत्थानं न सम्भवति।

५. अन्यस्य उत्थानं स्वीक्रीयते चेत् अकृतभ्यागमः कृतप्रणशः एतौ दोषौ भवतः।

अर्थात् यः सुप्तः स न प्रतिबुध्यते, अन्यः एव प्रतिबुध्यते इति स्वीक्रियते चेत्- कदाचित् पुरुषः कर्म करोति चेदपि फलस्य भोक्ता न भवति। कदाचित् कर्म न क्रीयते चेदपि फलं भुङ्क्ते। एवम् अकृतभ्यागमः कृतप्रणशः एतौ दोषौ भवतः।

पूर्वपक्षैः पूर्वे यत् उक्तम् जलराशौ प्रक्षिप्तः जलविन्दुः यथा उद्धर्तुं न शक्यते तथा सति सम्पन्नः जीवः न उत्पतितुमर्हति इति। तदा सिद्धान्तिभिः उक्तं यत् तथा न। यतोहि विवेककारणाभावात् जलविन्दोः अनुद्धरणम् इति युक्तमेव। किन्तु तत्र विवेककारणं कर्म अविद्या च वर्तते। यथा अस्मज्जातीयैः संसृष्टयोः क्षीरदकयोः दुर्विविचयोरपि हंसेन विवेचनं दृश्यते इति। अपि च जीवः ब्रह्मणः भिन्नः न। सदेव उपाधिसंसर्गात् जीवः इत्युपचर्यते। तर्हि एकः जीवः अपरः जीवः इति कथमुपपद्यते इति प्रश्नः। तदा उच्यते यत् यावत् एकोपाधिगता बन्धानुवृत्तिः तावत् एकजीवव्यवहारः। उपाध्यन्त-रगतायां बन्धानुवृत्तौ जीवान्तरव्यवहारः। इदानीम् अत्र प्रश्नः उदिति यत् सुषुप्तौ उपाधेः उपशमः भवति चेत् यः सुप्तः स एव उत्तिष्ठति इति कथं वक्तुं शक्यते। तदा समाधानत्वेन उच्यते यत् स्वापप्रबधयोः स एव अयम् उपाधिः बीजाङ्कुरन्यायेन वर्तते इति। अतः स एव जीवः प्रतिबुद्धते इति युक्तमेव।

**उपसंहारः**

यः सुप्तो जीवः स एव प्रतिबुध्यते न तु अन्यः। कुतः? इति चेत्- कर्मानुस्मृतिशब्दविधिभ्यः। दिनद्वयसाध्यं यत् कर्म तस्य अर्धं कृत्वा सुप्तः पुन उत्थाय परदिने अवशिष्टमर्धं कर्म करोति। एतच्च सुप्तप्रबुद्धयोः ऐक्ये सति संभवति। किञ्च पूर्वदिने योऽहं यमद्राक्षं द्वितीयदिने सोऽहं तं स्मरामि इति अनुभवानन्तरस्मरणं सुप्तप्रबुद्धयोः ऐक्यमन्तरा न संभवति। एवं कर्मानुस्मृतिशब्दविधिभ्यः यः सुप्तो जीवः स एव प्रतिबुध्यते इति।

**सहायकग्रन्थाः**


बादरायणः। (२०१३)। वेदान्तदर्शनम् (बङ्गीयपुस्तुकम्)। विश्वरूपा-नन्दस्वामी (व्याख्याता)। कलिकाता, उद्बोधनकार्यालयः।

ब्रह्मसूत्रशांकरभाष्यम् (श्रीमदनन्तशास्त्रिणा टिप्पण्यादिभिरुपस्कृतम्, श्रीवासुदेवशर्मणा च संस्कृतम्)। २०००। वाराणसी, कृष्णदास अकादेमी।

बृहदारण्यकोपनिषत्। सं.२०७०। गोरखपुर, गीताप्रेस्।

धर्मराजध्वरिन्द्रः। सं २०१०। वेदान्तपरिभाषा। मुसलगावकरः, श्रीसीतारामः(सम्पा.)। वाराणसी, चौखम्बा विद्याभवन्.

सदानन्दयोगीन्द्रः। (१९८२)। वेदान्तसारः (बङ्गपुस्तकम)। विपद-भञ्जनपालः(व्याख्याता)। कलिकाता, संस्कृतपुस्तुकभाण्डारः।


**पाद टिप्पणी: -**

[1] ब्र.सू-३.२.९

[2] छा.उ-६.८.१

[3] बृ.उ-४.३.६

[4] छा.उ-८.३.२

[5] छा.उ-६.९.३